PR8HJ8

# 18. नीतिनवनीतम्

1. क्षणे तुष्टाः क्षणे रुष्टाः रुष्टाः तुष्टाः क्षणे-क्षणे ।
अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः ॥1॥

2. सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वं जल्पन्ति मूढास्तु गुणैर्विहीनाः ॥2॥

3. येषां न विद्या न तपो न दानं,
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूताः,
मनुष्यरूपेण मृगाश्चरन्ति ॥3॥

4. उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः ॥4।.

5. शैले-शैले न माणिक्यं, मौक्तिकं न गजे-गजे ।
साधवो न हि सर्वत्र, चन्दनं न वने-वने ॥5॥

6. यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति ॥6॥

7. नरस्याभरणं रूपं, रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥7॥

## शब्दार्थाः

| | | |
|---|---|---|
| तुष्टाः | - | संतुष्ट होते हैं |
| क्षणे | - | क्षण में |
| घोषम् | - | आवाज |
| अव्यवस्थितचित्तानां | - | अव्यवस्थित चित्त का |
| प्रसादः | - | प्रसन्नता |
| कुम्भः | - | घड़ा |
| उपैति | - | प्राप्त होता है |

| | | |
|---|---|---|
| कुलीनः | - | अच्छा कुल |
| मर्त्यलोके | - | संसार में |
| भारभूताः | - | भार स्वरूप |
| उद्यमेन | - | प्रयत्न से |
| मनोरथैः | - | मनोरथों द्वारा |
| प्रविशन्ति | - | प्रवेश करते हैं |
| शैले-शैले | - | पर्वत-पर्वत में |
| सर्वत्र | - | सभी जगह |
| वने-वने | - | जंगल-जंगल में |
| यस्य | - | जिसका |
| लोचनाभ्याम् | - | आंखों से |
| नरस्याभरणम् | - | मनुष्य का आभूषण |

## अभ्यासः

**1. निम्नांकित प्रश्नों का संस्कृत भाषा में उत्तर दीजिए-**

क. केषां नराणां चित्तानि अव्यवस्थितानि ?

ख. के जनाः भुवि भारभूताः सन्ति ?

ग. विद्या विहीनः जनः कीदृशः भवति ?

घ. कस्य दर्पणः किं करिष्यति ?

ङ. नरस्याभरणम् किम् ?

**2. पहले और चौथे श्लोकों का अर्थ लिखिए-**

**3. पद पूर्ति कीजिए-**

क. येषां न विद्या न तपो ................ ।

ख. न हि सुप्तस्य सिंहस्य ..................... ।

ग. ........................ ज्ञानस्याभरणं क्षमा ।

**4. निम्नांकित शब्दों के अर्थ लिखिए-**

क. मृगाश्चरन्ति　　ख. सिध्यन्ति

ग. मौक्तिकम्　　घ. किं करिष्यति

PRAIIB